Adda247 GET IT ON Google Play

Civil Services (Main) Examination, 2024

PHKM-C-SNKT

# संस्कृतम् / SANSKRIT

## ( अनिवार्यम् ) / ( Compulsory )

समयः होरात्रयम् (घण्टा - त्रयम्)
*Time Allowed : **Three Hours***

पूर्णाङ्काः : 300
*Maximum Marks : **300***

---

**प्रश्नपत्रविषये विशेषनिर्देशाः**

***प्रश्नानां समाधानात् प्राक् सर्वेऽपि अधोलिखिताः निर्देशाः सावधानतया पठनीयाः***

*सर्वेऽपि प्रश्नाः समाधेयाः ।*

*प्रत्येकं प्रश्नस्य/प्रश्नभागस्य अङ्काः तत्पुरत एव निर्दिष्टाः ।*

*यदि अन्यथा निर्देशो न भवेत् तर्हि प्रश्नानाम् उत्तराणि **संस्कृतभाषया** एव देवनागरीलिपिनिबद्धया लेखनीयानि ।*

*यद्यपि शब्दसीमा निर्धारिता तत्र सा अनुपालनीया एव । उत्तराणि चेत् सीमातः अधिकमात्रया विस्तीर्णानि लघूत्तराणि वा भवेयुः तदा अङ्कहानिः भविष्यति ।*

*प्रश्नपत्रसहितोत्तरपुस्तिकायाः किमपि पृष्ठं पृष्ठांशो वा यदि रिक्तः त्यज्यते सः अवश्यं स्पष्टतया रेखाचिह्नेन निरसनीयः ।*

*प्रश्नक्रमानुसारेणैव क्रमेण प्रश्नोत्तराणि प्रदेयानि । नोचेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् भवेत् ।*

**Question Paper Specific Instructions**

***Please read each of the following instructions carefully before attempting questions :***

*All questions are to be attempted.*

*The number of marks carried by a question / part is indicated against it.*

*Answers must be written in **SANSKRIT** (Devanagari script) unless otherwise directed in the question.*

*Word limit in questions, wherever specified, should be adhered to and if answered in much longer or shorter than the prescribed length, marks may be deducted.*

*Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.*

*Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.*

---


Adda247
Test Prime
ALL EXAMS, ONE SUBSCRIPTION
1,00,000+ Mock Tests
Personalised Report Card
Unlimited Re-Attempt
600+ Exam Covered
25,000+ Previous Year Papers
500% Refund
IBPS
NABARD
ATTEMPT FREE MOCK NOW

Adda247 GET IT ON Google Play

**Q1.** **निम्नलिखितेषु विषयेषु कमप्येकं विषयमवलम्ब्य षट्शतशब्दै (600 परिमितशब्दैः) निबन्धो लेखनीय :** *100*

(a) लोकतन्त्रः अभिव्यक्तेः स्वतन्त्रता च

(b) किं भारते पेयजलस्य संकटः आसन्नः अस्ति ?

(c) जनजातीय संस्कृतिसंरक्षणम् : प्रयासः सम्भावनाश्च

(d) निस्सारस्य पदार्थस्य प्रायेणाडम्बरो महान्

**Q2.** **अधोलिखितं गद्यांशं सावधानं पठित्वा तदनुसारम् अधः प्रदत्तानां प्रश्नानामुत्तराणि स्पष्टतया समासतश्च शुद्धगिरा दीयताम् :** *12×5=60*

साहित्यस्य एकमङ्गमस्ति आलोचना, अतः सा साहित्यं स्वसीमायाः अन्तः स्थापयितुं व्यवस्थापयति। साहित्ये यदा किमपि तादृश्यं वस्तु सम्मिलितं भवति, तदा तस्य रसप्रवाहे बाधकं भवति, तदा तत्रैव साहित्ये दोषो जायते। यथा सङ्गीते कश्चित् विकृतस्वरः संगीतं दूषयति।

अस्माकं सद्भावानां प्रकाश एव आनन्दः अस्ति। असद्भावेषु तु दुःखानुभवो भवति। एवमपि भवितुं शक्नोति यत् कश्चित् मानवम् असद्भावोऽपि आनन्दानुभूतिं ददाति। हिंसां कृत्वा, कस्यापि धनाहरणं कृत्वा अथवा स्वार्थपूर्तिहेतुना कस्यापि अहितं कृत्वा अपि केचिज्जनाः आनन्दमनुभवन्ति परन्तु नास्ति एषा मनसः स्वाभाविकी वृत्तिः। चोरं प्रकाशात् अन्धकारः प्रियतरः भवति, अनेन प्रकाशस्य श्रेष्ठतायां कापि बाधा न भवति।

यैः भावैः वयमात्मानम् अन्येषु मेलयितुं शक्नुमः, सः सत्य-भावो भवति, स्नेहः अस्मान् अन्येभ्यो वस्तुभ्यो मेलयति, अहंकारः पृथक्करोति। यस्मिन् अहंकारस्य मात्रा अधिका भवति, स अन्येभ्यः कथं मेलयिष्यति। अतः प्रेम सत्यभावः अस्ति अहंकारः असत्यभावः।

भक्त्यर्थं कमपि प्रत्यक्षवस्तु अपेक्षितम्। दयार्थमपि कस्यापि पात्रस्य आवश्यकता भवति। धैर्यार्थं साहसार्थमपि अस्माकं कस्यापि अवलम्बनस्य आवश्यकता भवति। तात्पर्यमिदमस्ति यद् अस्माकं भावानां जागरणाय तेषां बाह्यवस्तुभ्यः सामञ्जस्यम् आवश्यकमस्ति। अथ चेत् बाह्यप्रकृतेः अस्माकमुपरि यदि प्रभावो न स्यात्, अथ चेत् वयं कमपि पुत्रशोके विलपितं दृष्ट्वा चत्वारः अश्रुबिन्दवः न पातयितुं शक्नुमः, यदि वयं कुत्रापि आनन्दोत्सवे मिलित्वा आनन्दिता न भवितुं शक्नुमः, तदा स्वीकरणीयमिदं यत् वयं निर्वाणमधिगतवन्तः। तदा तस्मिन् काले साहित्यस्य नास्ति मूल्यम्। सत्साहित्यकारस्तु स एव भवति यः

Adda247 GET IT ON Google Play

संसारस्य सुख-दु:खे सुखी अथवा दु:खी भवेत्; अथ च परेषां सुखभावम् अथवा दु:खभावम् उत्पादयितुं समर्थ: भवेत् । स्वस्य केवलं दु:खानुभूति: न पर्याप्ता । कलाकारे तं प्रकटयितुं सामर्थ्यं भवेत् । परन्तु परिस्थितयो मानवं भिन्नदिक्षु स्थापयन्ति । मानवमात्रे भावानां समानता भवितुमपि परिस्थितिभेदात् प्रतिक्रियासु भेद: दृश्यते । यदि वयं कृषकै: सह वसाम: अथवा तै: सह निवसनस्य अवसर: प्राप्त:, तदा स्वभावत: वयं तेषां सुख-दु:खम् आत्मनि स्वीकुर्म:, अथ च यथा भावानां गूढता भवति तदनुसारमेव प्रभाविता: भवाम: । एवमेव अन्या: परिस्थितय: ज्ञातव्या: । अथ अस्य अर्थ: अयं भवेत् यत् अमुक: जन: कृषकाणाम् अथवा श्रमिकाणां आन्दोलनस्य प्रचारं करोति, अन्यायोऽम् । साहित्यप्रचारयोर्मध्ये को भेद: ? प्रचारे यदि आत्मविज्ञापनं न स्यात् तदा विशेषमेकमुद्द्येश्यं पूरयितुं या उत्सुकता भवति सा साधनानां चिन्ता न पारयति । साहित्यं शीतल: मन्द: समीरोऽस्ति य: सर्वान् शीतलीकरोति, आनन्दयति च । प्रचार: झंझावातो भवति यो हरित-पूरित-वृक्षान् उत्क्षिपति । अथ च उटजं प्रासादं स्पन्दयति । स रसविहीनोऽपि नास्ति आनन्दकारक:, यदि कश्चित् कलाकार: तत्र सौन्दर्यं रसपूर्तिञ्च करोति तदा स प्रचारस्तु न भूत्वा सत्साहित्यस्य वस्तु जायते ।

(a) आलोचना साहित्यस्य अङ्गं कथं भवति ? *12*

(b) सत्यासत्यभावेन क: आशय: ? *12*

(c) मनस: स्वाभाविकी वृत्ति: का नास्ति ? *12*

(d) लेखकदृष्ट्या साहित्यकार: क: भवितुं शक्नोति ? *12*

(e) साहित्यप्रचारयोर्मध्ये को भेद: ? *12*

**Q3.** **अधोवर्तिगद्यांशस्य संक्षेपो मूलभागस्य तृतीयांशपरिमित: स्वशब्दै: लेख्य: । शीर्षको न प्रदेय: । संक्षेपो स्वशब्दै: लेख्य: ।** ***60***

ध्यानयोग्यमस्ति यत् ईर्ष्या व्यक्तिविशेषात् भवति । ऐश्वर्य-गुण-मान-सम्पन्नात् वा ईर्ष्या जायते एवं न भवति । ईर्ष्या तेभ्यो भवति येषां विषये धारणेयं भवति यत् जनदृष्टि: अस्माभिस्सह तेषामुपरि अपि अवश्यं भविष्यति । स्वस्मात् दूरता-कारणात् स्वेन साकं येषां जनानामुपरि ध्यानं न भवति तेषां कृते ईर्ष्या न समुद्भवति । काशीस्थं धनिकं यूरोपदेशवासिन: धनिकस्य वार्त्तां श्रुत्वा ईर्ष्या नोत्पद्यते । हिन्दीभाषाया: कवे: आङ्गलभाषाया: कवेर्महत्त्वं श्रुत्वा ईर्ष्या न भविष्यति । सम्बन्धिनां बालसखानां सहपाठिनां प्रतिवेशिनां मध्ये ईर्ष्याया: विकास अधिको दृश्यते । बाल्यकालात् यो जन: मित्रेण सार्धमेव निवसन् क्रीडन्नस्ति, तयोरेक: अन्यस्य अग्रवर्धनात् ईर्ष्याग्निदग्धो दृश्यमानो भवति । यदि मित्रयोर्मध्ये कश्चित् एक: उच्चपदासीनो भवति

Adda247 GET IT ON Google Play

तदा स उद्योगेऽस्मिन् संलग्नो दृश्यते यत् अन्यः कोऽपि उच्चपदासीनो न भवतु । प्रायः जनाः स्वोन्नते रहस्यभूतानां तत्त्वानामन्वेषणं कुर्वन्तः स्वकीयं प्राचीनमित्रं प्राप्नुवन्ति । यस्मिन् काले संसर्गसूत्रेण बद्धवा वयमन्यान् आत्मना सह एकपंक्तौ स्थापयामः, तस्मिन् काले सहानुभूति-सहायता-इत्यादिकस्य सम्भावना प्रतिष्ठिता सती ईर्ष्या-द्वेषयोः सम्भावनायाः सूत्रपातमपि भवति । स्वकीय-विधानात् यदि वयं कल्याणस्य एव कल्याणस्य सम्भावनायाः सूत्रपातं कुर्मः, एवं भविष्यस्य अनिश्चये बाधां स्थापयामः, एवं कदापि न सम्भवेत् । भविष्यस्य अनिश्चयात्मकता अटला अजेया च वर्तते । स्व-अनेक-विद्याबुद्ध्या अपि वयं तां निवारयितुं न पारयामः ।

अधुना अयं विचार-विषयः भवति, ईर्ष्या संसारस्य घटकतत्त्वेषु ईर्ष्याया कर्त्तारं ईर्ष्यापात्रञ्च अतिरिच्य ईर्ष्यास्थितिमवलोकयनाय समाजोऽपि अपेक्षते । अस्य समाजस्य एव धारणाविशेषं प्रभावयितुं सर्वः ईर्ष्याप्रसंगः प्रचलति, न तु ऐश्वर्यं गुणं मानं वा अनुदघाट्यैव, न तु गुप्तरूपेण समुदायविशेषं विदिमकृत्वैव ऐश्वर्यस्य गुणस्य मानस्य वा सुखं भोक्तुं सन्तोषं वा अवाप्तुम् । कामं ऐश्वर्यतः गुणतः वा वयं कस्मात् चित् श्रेष्ठः न स्याम तत् समानाः न स्याम तथापि यदि समाजः तस्मात् अस्मान् श्रेष्ठान् जानाति, तास्तान समानान् वा पश्यति तदा वयं सन्तुष्टाः तिष्ठामः, ईर्ष्याजनितं घोरं कष्टं न अनुभविष्यामः । विचित्रं हि किल एतत् गुणवस्तुतः वंचिता अपि वयं समाजस्य दृष्टिमात्रेणैव सन्तुष्टाः तिष्ठामः । ईर्ष्या सामाजिकजीवनगताया कृत्रिमताया उत्पन्नं विषमेकमस्ति । अस्यैव खलु अयं प्रभावः यत् वयम् अन्यं वर्धमानम् वीक्ष्य तत्र कामपि स्वकीयां हानिम् अपश्यन्तोऽपि व्यर्थं दुःखिनो भवामः ।

न्यायाधीशः न्यायं करोति, कर्मकरः इष्टीः योजयति । न्यायाधीशस्य सामान्य-व्यवहारे समाजकल्याणभावनया कर्मकरं प्रति एतत् प्रकटीकरणं नोचितं यत् त्वम् अस्मत् न्यूनोऽसि । यस्मिन् उच्चता-निम्नतायाः अभिमानः पदे-पदे दृढीभवति, तस्मिन् भिन्न-भिन्न वर्गेषु स्थायी ईर्ष्या स्थापिता भवति, अथ च संघशक्तिविकासः कदाचित् एव दृश्यमानो भवति । यदि समाजे यत्र प्राणिनः भिन्न-भिन्न कार्यसम्पादनान्तरं जीवनयापनं कुर्वन्ति तत्र परस्परं निम्नता अथवा उच्चतायाः डिण्डिमघोषो न भवेत् अपितु तेषां विभिन्नतायाः एव स्वीकरणं भवेत् तदा अधिकांशा असन्तोष भावना दूरी भवति । यत्र उच्चावचभावस्य बहुप्रचारो जायते अथ च स समाजे प्रकाशते, तत्र जनशक्तयः केवलं विशिष्टेषु स्थानेषु प्रवृत्ता भूय तेषु तेषु स्थानेषु एकत्रिता भवन्ति । अनेन समाजस्य कार्यविभागेषु विषमता प्रसरति ।

*(362 शब्द)*

Adda247 GET IT ON Google Play

**Q4.** अधोलिखितगद्यांशस्य आंग्लभाषया अनुवादः करणीयः – *20*

भारतदेशे पुनश्च एकबारं कुटीर-उद्योगस्य लघु-उद्योगस्य च विषये चर्चा बलवती वर्तते । एतादृशाणाम् उद्योगादीनां मूले गृह-उद्योगस्य लघु-लघु कर्मव्यापारस्य परिकल्पना निगूढा भवति । कोऽपि जनः लघुस्थाने अल्पधनं निवेश्य परिश्रमेण स्वलघु-उद्योगं स्थापयित्वा वस्तूत्पादने सहभागी भूत्वा स्व-आजीविकायाः समस्यायाः निराकरणं कर्तुं शक्नोति, एवं स वृत्तिहीनतामपाकृत्य सामान्यतया स्वजीवनयापने समर्थो भवति । स्वतन्त्रतासंग्रामदिवसेष्वेव महात्मागान्धी अमूं विषयं ज्ञातवान् आसीत् यत् भारतसदृशाय देशाय एतादृशस्य लघु-उद्योगादय एव हितकराः भवितुं शक्नुवन्ति । स स्वतन्त्रे भारते तदवत् लघूद्योग-स्थापनाय परम्परागतानाम् उद्योगानां नवीनीकरणाय प्रेरणां दत्तवान् आसीत् । परन्तु स्वतन्त्रतायाः पश्चात् नेतृत्वधारिणः विषयेऽस्मिन् ध्यानं न दत्तवन्तः । विशालातिविशालः उद्योगव्यापारः अत्र सुस्थापितः अभूत् तेऽपि समर्थानां निजसम्पत्तिः भूत्वा अतिष्ठन् । अत्र जनसंख्यावृद्धिः, शिक्षा-प्रचारः, जागृतिः, अधिकार-याचना परिचयः वृत्तिहीनानां नैरन्तर्यः तेषा पंक्तिदीर्घता — एताः सर्वाः अद्यतनस्य जागृतचिन्तकान् विवशीकृतवत्यः । भवतु नाम विलम्बेन देशस्य एतादृशानां वर्धमानानां समस्यानां निराकरणाय गान्धिवादी सूत्राणाम् आवश्यकता वर्तते, यानि अस्य देशस्य आवश्यकतां पूरयितुं शक्नुवन्ति । परिणामस्वरूपम् अद्य देशे कुटीर-उद्योगानां जालं प्रसारितम् अस्ति ।

**Q5.** अधस्तनगद्यांशस्य संस्कृतभाषानुवादः करणीयः – *20*

In our democratic system, the press has a vital role. While there has been large-scale expansion of the print and visual media in recent years, a focused approach to dealing with major societal and political issues has still to evolve. There is, as yet, excessive and exaggerated coverage of exposures and scandals and far too little well-informed comment or analysis of the various deep-rooted factors which generate the continuing malaise. The media could make an extremely useful contribution by devoting adequate coverage to tasks well done, highlighting the achievements of honest and efficient public servants and organizations, according special attention to developments in the remote and backward areas of our country. Our media is free and unfettered. It should be able to expose cases and incidents involving irregular and unlawful exercise of authority and abuses of all kinds. The existing ills in our socio-political environment will, on present reckoning, take considerable time to remedy. The Department of Personnel and Administrative Reforms should focus on establishing institutions responsible for all personnel matters — appointments, postings, transfers etc. — without any external interference. Also, there is a need for adoption of a robust code of ethics to be followed by those involved in public functioning.

Adda247 GET IT ON Google Play

**Q6.** **(a)** **अधोलिखितानां स्वरचितेषु वाक्येषु प्रयोग: कार्य: –** *2×5=10*

(i) सदा *2*

(ii) इत्थम् *2*

(iii) बाढम् *2*

(iv) स्विद् *2*

(v) किल *2*

**(b)** **पदसाधनं क्रियताम् :** *1×10=10*

(i) दण्डिन् + द्वितीया, बहुवचनम् *1*

(ii) हरि + षष्ठी, द्विवचनम् *1*

(iii) जगत् + पञ्चमी, एकवचनम् *1*

(iv) अश्रु + द्वितीया, द्विवचनम् *1*

(v) गो + सप्तमी, बहुवचनम् *1*

(vi) भू + लङ्, उत्तमपुरुषे, बहुवचनम् *1*

(vii) चुर् + लोट्, मध्यमपुरुषे, द्विवचनम् *1*

(viii) ज्ञा + विधिलिङ्ग, प्रथमपुरुषे, बहुवचनम् *1*

(ix) भुज् + लङ्, प्रथमपुरुषे, एकवचनम् *1*

(x) क्री + लट्, प्रथमपुरुषे, द्विवचनम् *1*

**(c)** **समासो विधेय: समासनाम च लेखनीयम् :** *2×5=10*

(i) द्वन्द्वानाम् अभाव: *2*

(ii) अक्षेषु जय: *2*

(iii) पञ्चगङ्गम् *2*

(iv) गोमहिषम् *2*

(v) अनन्याय: *2*

Adda247 GET IT ON Google Play

(d) अधोलिखितानि वाक्यानि शुद्धीकरणीयानि : *2×5=10*

(i) मनः सत्यात् शुद्धयति। *2*

(ii) अहम् उत्थानं शक्नोति। *2*

(iii) भूपालः राजस्य भुनक्ते। *2*

(iv) वेदो अखिलः धर्ममूलेन। *2*

(v) वरम् एषः वरस्तृतीयः। *2*

Adda247